## ॥ अथ नीळा सूक्तम् ॥

श्रृण्वन्तिश्रोणाममृतस्य गोपम् । पुण्यामस्या उपश्रृणोमिवाचम् । महीं देवीं विष्णुपत्नीमजूर्याम् । प्रतीचीमेनौं हविषा यजामः । त्रेधा विष्णुरुरुगायो विचक्रमे । महीं दिवं पृथिवीमन्तरिक्षम् । तच्छ्रोणैति श्रव इच्छमाना । पुण्यँ श्लोकँय्यजमानाय कृण्वती ॥

गुणाहि । घृतवती सवितराधिपत्यैः पयस्वतीरन्तिराशानो अस्तु । ध्रुवा दिशाँ व्विष्णु पत्न्यघोराऽस्येशाना सहं सोयामनोता । बृहस्पतिर्मातरिश्वोतवायुस्सन्धुवाना वाता अभिनो गृणन्तु । विष्टंभो दिवो धरुणः पृथिव्या अस्येशाना जगतो विष्णुपत्नी ॥

ओं महादेव्यै च विद्महे विष्णुपत्न्यै च धीमहि । तन्नो नीळा प्रचोदयात् ॥